शास्त्री - II साहित्य
रत्नावली

Date ___/___/___

प्रश्न (1) - कवेः सामान्यः परिचयः देयः ?

उत्तरम् - महाराजः श्रीहर्षः भारतीयेतिहासे हर्षवर्धननाम्ना प्रसिद्धः। अस्य पिता कान्यकुब्जस्य राजा प्रभाकरवर्धनः एवं माता यशोमती देवी आसीत। ज्येष्ठः भ्राता राजवर्धनः 662 विक्रम - सम्वत्सरे पितरि दिवंगते राजस्य अधिकारी अभवत्। गौडनरेशः शशांकः केनापि प्रकारेण प्रवञ्चनं दत्वा राजवर्धनस्य जीवनं समाप्तं कारितं। तदनन्तरं हर्षवर्धनः 673 वि. सम्वत्सरे सिंहासनम् अध्यास्ते तस्य राज्यकाले नितरां प्रसन्नाऽऽसीत्।

साहित्य-शास्त्री-प्रथमखण्ड - अभिज्ञान शाकुन्तलम्
लघुत्तरीयाणि प्रश्नोत्तराणि

प्र० (1) - अभिज्ञानशाकुन्तले के मुनित्रय ?

उत्तरम् - अभिज्ञान शाकुन्तले त्रयः मुनयः सन्ति -
1. कण्वः 2. दुर्वासा 3. मरीचिनन्दनः कश्यपश्च।

प्र० (2) - शार्ङ्गरवशारद्वतौ कौ ?

उत्तरम् - शार्ङ्गरवशारद्वतौ महर्षिकण्वस्य व्यवहारज्ञौ आज्ञाकारिणौ शिष्यौ स्तः।

प्र० (3) - अनसूयाप्रियंवदे के ?

अनसूयाप्रियंवदे शकुन्तलायाः प्रियसख्यौ।

Renu Devi
19/08/20
राधा उमाकान्त सं० महावि० सुखसेन
पूर्णिया

उपशास्त्री -I साहित्य - तृतीय-पत्रम
रघुवंश महाकाव्यम् - द्वितीय सर्गः

प्र० (1) - पद्य मिदम् व्याख्येयम् ।
शशाम वृष्ट्याऽपि बिना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः
ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वने गोप्तरि गाहमाने

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके कविः राजा दिलीपस्य गुणस्य व्याख्यानं करोति ।
धर्मात्मनो राज्ञो दिलीपस्य तस्मिन् वने प्रवेश मात्रेण वृष्टिं विनापि वनाग्निः शान्तो जातः, फलेषु पुष्पेषु च वैशिष्ट्यमभवत्, किञ्च जीवो जीवस्य भक्षणम् इत्यानुसारं वन्यपशुषु परस्परं प्रबलः प्राणी दुर्बलं न पीडितवान् ।

व्याख्या :- गोप्तरि = रक्षके, तस्मिन् = राजनि दिलीपे, वनं = विपिनम्, गाहमाने = प्रविशति सति, वृष्ट्या विनापि = वर्षणमन्तरापि, स्वयमेव दवाग्निः = वनानलः, शशाम = शान्तः, फलपुष्पवृद्धिः = फलकुसुमसमृद्धिः, विशेषा = अतिशयित आसीत् = बभूव, किञ्च सत्त्वेषु = जन्तुषु मध्ये, अधिकः प्रबलो बलवान् वा सिंहादि, ऊनं = दुर्बलं मृगादिकम्, न बबाधे = नैव पीडयामास ।

Renu Devi
19/08/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

शास्त्री-II साहित्य · तृतीय · पत्रम्
किरातार्जुनीय महाकाव्यम् - प्रथमः सर्गः
Date परीक्षोपयोगी प्रश्नोत्तरी
(1)प्र० - पद्यमिदम् व्याख्येयम् ।
श्रियः कुरूणामधिपस्य पालनीं,
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
सवर्णिलिंगी विदितः समाययौ,
युधिष्ठिरं द्वैतवने वनेचरः ॥
उत्तरम् = प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि भारविप्रणीतस्य किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके महाराजः युधिष्ठिरः स्वपितृव्य भ्रातुः दुर्योधनस्य द्यूतकपटेन स्वराज्यस्य पराधीनत्वात् त्रयोदश वर्षाणि यावत वनवासस्य प्रतिज्ञां निर्वाह्य द्वैतवने निवसन्नासीत् । तदानीं दुर्योधनस्य राज्यस्य समाचारान् अवगन्तुम् प्रेषितः गुप्तचरः वनेचरः तत्र सर्वं विज्ञाय स्वस्वामिनः । युधिष्ठिरस्य अन्तिकम् आगच्छति ।
व्याख्या: — कुरुजनपदानां राज्ञः स्वामिनः दुर्योधनस्य राजलक्ष्मी संरक्षिकाम् अर्थात् प्रजापालनपद्धतिं सम्यग् अवगन्तुं महाराजः युधिष्ठिरः यं पूर्वं नियुक्तवान् स्वगुप्तचररूपेण, सः ब्रह्मचारी वेषधारी किरातः दुर्योधनस्य राज्यस्य सर्वाणि वृत्तानि सम्यक् प्रकारेण ज्ञात्वा, तेषां गम्भीरमध्ययनं कृत्वा द्वैतवननामानं तपोवनं स्व-स्वामिनः युधिष्ठिरस्य पार्श्वम् प्रत्यागतवान् । अस्मिन् श्लोके कविना श्रियः पदस्य प्रयोगं विधाय मंगलाचरणं विहितम् ।

Renu Devi
19/08/20
राध्या उमाकान्त सं० महावि० सुरखसे-
पूर्णिया ।

Page No.